श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीविष्णुपुराणे मुचुकुन्द कृता

# ॥ श्री भगवत्स्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री भगवत्स्तुतिः ॥

संसारपतितस्यैको जन्तोस्त्वं शरणं परम्।
प्रसीद त्वं प्रपन्नार्तिहर नाशय मेऽशुभम्॥ 1 ॥

त्वं पयोनिधयश्शैलसरितस्त्वं वनानि च।
मेदिनी गगनं वायुरापोऽग्निस्त्वं तथा मनः॥ 2 ॥

बुद्धिरव्याकृतप्राणाः प्राणेशस्त्वं तथा पुमान्।
पुंसः परतरं यच्च व्याप्यजन्मविकारवत्॥ 3 ॥

शब्दादिहीनमजरममेयं क्षयवर्जितम्।
अवृद्धिनाशं तद्ब्रह्म त्वमाद्यन्तविवर्जितम्॥ 4 ॥

त्वत्तोऽमरास्सपितरो यक्षगन्धर्वकिन्नराः।
सिद्धाश्चाप्सरसस्त्वत्तो मनुष्याः पशवः खगाः॥ 5 ॥

सरीसृपा मृगास्सर्वे त्वत्तस्सर्वे महीरुहाः।
यच्च भूतं भविष्यं च किञ्चिदत्र चराचरम्॥ 6 ॥

मूर्तामूर्तं तथा चापि स्थूलं सूक्ष्मतरं तथा।
तत्सर्वं त्वं जगत्कर्ता नास्ति किञ्चित्त्वया विना॥ 7 ॥

मया संसारचक्रेऽस्मिन्भ्रमता भगवन् सदा।
तापत्रयाभिभूतेन न प्राप्ता निर्वृतिः क्वचित्॥ 8 ॥

दुःखान्येव सुखानीति मृगतृष्णा जलाशया।
मया नाथ गृहीतानि तानि तापाय मेऽभवन्॥ 9 ॥

राज्यमुर्वी बलं कोशो मित्रपक्षस्तथात्मजाः।
भार्या भृत्यजनो ये च शब्दाद्या विषयाः प्रभो॥ **10** ॥

सुखबुद्ध्या मया सर्वं गृहीतमिदमव्ययम्।
परिणामे तदेवेश तापात्मकमभून्मम॥ **11** ॥

देवलोकगतिं प्राप्तो नाथ देवगणोऽपि हि।
मत्तस्साहाय्यकामोऽभूच्छाश्वती कुत्र निर्वृतिः॥ **12** ॥

त्वामनाराध्य जगतां सर्वेषां प्रभवास्पदम्।
शाश्वती प्राप्यते केन परमेश्वर निर्वृतिः॥ **13** ॥

त्वन्मायामूढमनसो जन्ममृत्युजरादिकान्।
अवाप्य तापान्पश्यन्ति प्रेतराजमनन्तरम्॥ **14** ॥

ततो निजक्रियासूति नरकेष्वतिदारुणम्।
प्राप्नुवन्ति नरा दुःखमस्वरूपविदस्तव॥ **15** ॥

अहमत्यन्तविषयी मोहितस्तव मायया।
ममत्वगर्वगर्त्तान्तर्भ्रमामि परमेश्वर॥ **16** ॥

सोऽहं त्वां शरणमपारमप्रमेयं
सम्प्राप्तः परमपदं यतो न किञ्चित्।
संसारभ्रमपरितापतप्तचेता
निर्वाणे परिणतधाम्नि साभिलाषः॥ **17** ॥

॥ इति श्री भगवत्स्तुतिः समाप्ता॥